# १९. राष्ट्रभक्तिः ।

अथ कोऽपि यात्रिकः प्रतिदिनं रेलयानेन यात्रां करोति स्म । एकदा तस्यैव पृष्ठतः दीर्घासने एका छात्रा उपाविशत् । अकस्मात् सा शालास्यूतम् उद्घाट्य सूचिं तथा सूत्रं स्व्यकरोत् । यात्रिकः कुतूहलेन तां पश्यति स्म। बालिका शालास्यूते किमर्थं सूचिसूत्रे आनयति? तथा च रेलयाने ताभ्यां किं प्रयोजनम्? इति यात्रिकः अचिन्तयत्। सा बालिका सूच्यां सूत्रं निवेश्य आसनस्य छिन्नं तल्पं यथापूर्वम् अकरोत् । यात्रिकः अपृच्छत्, ''अयि बालिके, त्वं किं करोषि?'' बालिका अवदत् '' एतद् रेलयानम् अस्माकं कृते अस्ति । एतत् राष्ट्रस्य सम्पत्तिः खलु। तस्य सुरक्षणम् अस्माकम् आद्यं कर्तव्यम् एव । अहं तदेव करोमि ।'' बालिकायाः एतद् उत्तरम् अतीव बोधप्रदम्। अनेन उत्तरेण भूरि प्रभावितः सः यात्रिकः विचारमग्नोऽभवत् ।

भोः बालकाः, वयमपि सर्वे राष्ट्रसम्पत्तेः सुरक्षणाय, राष्ट्ररक्षणाय संवर्धनाय च कटिबद्धाः भवामः । राष्ट्रधर्मम् आचरामः ।

## भाषाभ्यासः

१. एकवाक्येन उत्तरत ।

(१) यात्रिकः केन यात्रां करोति स्म?
(२) छात्रा कुत्र उपाविशत्?
(३) बालिकायाः शालास्यूते किम् आसीत्?
(४) वयं किम् आचरामः?
(५) बालिकायाः उत्तरं कीदृशम् अस्ति?

२. माध्यमभाषया उत्तरं लिखत ।

(१) का नाम राष्ट्रसम्पत्तिः ?
(२) राष्ट्रसम्पत्तेः सुरक्षणाय यूयं किं कुरुथ ?

३. प्रश्ननिर्माणं कुरुत ।

(१) यात्रिकः कुतूहलेन बालिकां पश्यति स्म ।
(२) वाहनस्य सुरक्षणम् अस्माकम् आद्यं कर्तव्यम्।

४. गद्यांशतः समानार्थकशब्दान् लिखत ।

(अ) औत्सुक्यम्- (आ) धनम्- (इ) विद्यालयः- (ई) दोरकः-

५. गद्यांशतः विरुद्धार्थकशब्दान् लिखत ।

(अ) नयति ×.......... । (आ) उत्तिष्ठति ×.......... ।

६. कः कं वदति?

(१) ''अयि बालिके, त्वम् किं करोषि?''

७. मेलनं कुरुत ।
विशेषणानि- बोधप्रदम्, विचारमग्नः, छिन्नम्
विशेष्याणि- यात्रिकः, तल्पम्, उत्तरम्

I9PZXD

८. कोष्टकं पूरयत ।

| नाम | सर्वनाम | लट्रूपाणि | लङ्रूपाणि |
|---|---|---|---|
| | | | |

(बालिकया, आचरामः, अहम्, पृच्छति, आसनस्य, एतद्, उत्तरेण, करोमि, अस्माकम्, यात्राम्, अभवत्, उपाविशत्, आनयति)